# पर्याय-शैक्षणिककार्ययोजना

## अक्टोबर् – २०२१-२२

## सप्तमी कक्ष्या ( 7th Standerd)

**रचनासमितिः**
**१.विद्वान् माधव अडिगः - सर्वकारीय प्रौढशाला, कोणि इ कुन्दापुरम् ।**
**२.विद्वान् वेङ्कटरमण उपाध्यायः - सर्वकारीय प्रौढशाला, वळकाडु, उडुपि ।**

| क्रम संख्या | मासः/सप्ताहः Month/Week | अधिगमफलानि Learnig out come | निदेशात्मक क्रियाकलापः Activity | मौल्यमापनम्-क्रियाकलापः Evaluation activity |
|---|---|---|---|---|
| 1 | अक्टोबर् मासः October 2021 | <u>शिशुगीतम्</u> | | |
| | प्रथमसप्ताहः (1st Week) क्रियाकलापः १ | ➢ सुष्टुगानकौशलाभिवर्धनम् ।<br>➢ श्लोकाध्ययनाभिरुचिवर्धनम् ।<br>➢ पद्ये विद्यमानशब्दानां परिचयः । | • लय-प्रास-श्रुतिबद्धगानविधानं प्रदर्श्य, तथैव अनुगातुं प्रोत्साहः ।<br>• अन्यश्लोकानां चयने प्रोत्साहः।<br>• कठिणशब्दानां अर्थचयनम् । अर्थावगाहनम् च । अन्वयः । तत्पर्यदर्शनम् । | ▪ श्लोकानां सुष्टुगानम् । स्पष्टतायाः परिशीलनम् ।<br>▪ संगृहीतश्लोकानाम् गानम् । अर्थकथनार्थं प्रयत्नः च ।<br>▪ कूजति, डयते, ददामि, पिब,चणकः इत्यादि पदानां |

| | | | | |
|---|---|---|---|---|
| | | | | अर्थं वक्तुम् प्रश्नकरणम् । |
| | क्रियाकलाप: 2 | ➢ प्रसिरप्रीतिवर्धनम् ।<br>➢ पक्षिणां नामपरिचय:। | ● सर्वेषां स्वास्थ्यसंरक्षणर्थं परिसरस्त्रस्य रक्षणम् अनिवार्यं इति विषये अनुभवकथनम्<br>● चटकपक्षिगुणलक्षण विषये परस्पर संवाद: । अन्य पक्षिणां नाम उल्लेख: । | ▪ परिसर: हानि: कथम् ? परिसररक्षणं कथम् इति सल्लाप: ।<br>▪ गणद्वयं विरचय्य पक्षिण: नामकथन , अथवा कूजनप्रदर्शन द्वारा पक्षिनाम कथनम् इत्यादि। |
| | क्रियाकलाप: 3 | ➢ लट् लकरास्य परिचय।<br>➢ लट् लकारक्रियापदानां पुरुषाणां च सम्बन्धावगम: । | ● कूजति,कूजसि,कूजामि इत्यादि क्रियापदानि कदा कदा उपयोज्यानि इति प्रदर्शन द्वारा लकारपुरुष पुरुषपरिचय:।<br>● अस्ति –नास्ति पदयो: अर्थव्यत्यासं प्रत्यक्ष उदाहर्णै: सह प्रदर्शनम् । | ▪ मध्यपुरुषप्रयोग: कदा सम्भवन्ति इति उदाहरणं प्रदर्शयितुं प्रोत्साहनम् । दोषसमीकरणार्थं सहाय:<br>▪ प्रकोष्टे विद्यमानं वस्तु प्रदर्श्य अस्ति वा ? नास्ति वा इति प्रश्नकरणं । वाक्यकर्तुं छात्रेभ्य: प्रोत्साहनम् । |

## अभ्यासपत्रिका

1] एकवाक्येन उत्तरयत -

१.किं सर्वेषा मुदं जनयति ?

२.चटक चटक रे चटक इति गीतस्य रचयिता क:?

३.चिंव् चिंव् इति क: कूजति ?

४.अन्ते शिशु: चटकं कां पाठय इति प्रार्थयति ?

५.चटक: कुत्र विहरति ?

2] रिक्तस्थानं पूरयत -

१.__________ ____________ कूजसि त्वं विहग ।

२.खादसि ___________ मधुराणि ।

३.ददामि तुभ्यं बहु __________ ।

४.___________ स्वीकुरु पिब रे नीरम् ।

3] विजातीय पदं चिनुत ।

१.कूजसि, निवससि, नास्ति, विहरसि ।

२.चटक:, काक:, कोकिल:, व्याघ्र: ।

३.धान्यम्, नीरम्, मधुरम्, नीडम् ।

----------------***----------------------

| क्रम संख्या | मासः/सप्ताहः Month/Week | अधिगमफलानि Learnig out come | निदेशात्मक क्रियाकलापः Activity | मौल्यमापनम्-क्रियाकलापः Evaluation activity |
| --- | --- | --- | --- | --- |
| 2 | अक्टोबर् मासः October 2021 | <u>तिङन्तप्रकरणम्</u> | | |
| | द्वितीयः सप्ताहः (2nd Week) क्रियाकलापः १ | ➢ धातुपरिचयः,<br>➢ लकारपरिचयः।<br>➢ पुरुषवचनपरिचयः । | ● क्रियापदस्य नामपदस्य च व्यत्यासं प्रदर्श्य अभिप्रेरणम् ।<br>● कालाद्यर्थसम्बन्धि दश लकाराणाम् अर्थसहितं विवरणम् ।<br>● अस्मद् शब्दस्य, युष्मद् शब्दस्य, इतरशब्दस्य प्रयोगसन्दर्भे क्रियापदं कथं परिवर्तितं भवति इति प्रदर्शनपूर्वकं पुरुषवचनानाम् अवगमः । | ▪ श्यामफलके पदानि विलिख्य सुबन्त तिङ्तयोः पृथःकरणम् ।<br>▪ लट् , लङ्, लृट् लकारस्य अर्थः कः इति प्रश्नकरणम्।<br>▪ पठ्, लिख्, गम्लृ इत्यादि धातूनां लट् लकाररूपाणि वन्दन्ति छात्राः । |
| | क्रियाकलापः 2 | ➢ परस्मै पदि, आत्मने पदि व्यत्यासज्ञानम्।<br>➢ लट् लकारे परस्मैपदि धातूनां रूपाणि कथं भवन्ति इति परिचयः । | ● पठति, लिखति, गच्छति, वर्तते, विद्यते, इत्यादि रूपाणां परिचयपूर्वकं परस्मैपदि आत्मनेपदि धातूनां परिचयः। | ▪ पदिद्वयस्य उदाहरणानि दत्वा आत्मनेपदि वा ? परस्मैपदि वा? इति प्रश्नकरणम् ।<br>▪ समूहतः, गणशः, एकैकशः अपि |

| | | | | |
|---|---|---|---|---|
| | | | • पठति, हसति, लिखति,गच्छति इत्यादिक्रियापदानां रूपाणाम् अभ्यास करणम् । | रटनाभ्यास: । |
| | क्रियाकलाप: 3 | ➢ लट् लकारे आत्मनेपदि धातूनां रूपाणि कथं भवन्ति इति परिचय: । | • शोभ् धतो: लट् लकारस्य रूपाणाम् अभ्यास:। वाक्ये उपयुज्य पुरुषवचनानां अवगमदृढीकरणम् । | ▪ लकारपुरुषवचन सम्बन्धि प्रशनकरणम्। सन्देहनिवारणम् च । |

## अभ्यासपत्रिका

1] एकवाक्येन उत्तरयत -

१.क्रियापदस्य मूलरूपं किम् ?

२.संस्कृतभाषायां कति धातव: सन्ति ?

३.गणा: कति भवन्ति ?

४.क्रियापदस्य नामान्तरं किम् ?

५.वर्तमानकालस्य लकार: क: ?

2] सूक्तं शब्दं चित्वा रिक्तस्थानानि पूरयत -

१. स: पाठं _________ । (पठति / पठामि)

२.त्वं चित्रं _________ । (लिखति / लिखसि

३.वयं देवालयं _________ ।(गच्छाम: / गच्छन्ति)

४.बालका: देवं __________ ।(प्रार्थयते / प्रार्थयन्ते)

3] रिक्तस्थानं पूरयत ।

१. नमति, ______, नमन्ति ।

२. _______, पिबाव:, पिबाम: ।

३.वर्तते, वर्तेते, __________ ।

४. _______, चोरयथ:, चोरयथ ।

५.प्रार्थये, ______, प्रार्थयामहे ।

----------------***---------------------*****----------------***--------------------
--

| क्रम संख्या | मास:/सप्ताह: Month/Week | अधिगमफलानि Learnig out come | निदेशात्मक क्रियाकलाप: Activity | मौल्यमापनम्- क्रियाकलाप: Evaluation activity |
|---|---|---|---|---|
| 3 | अक्टोबर् मास: October | संस्कृतवाङ्मयम् | | |

| | | | | |
|---|---|---|---|---|
| | 2021 | | | |
| | तृतीय:सप्ताह: (3rd Week)<br>क्रियाकलाप: १ | ➢ भारतीय प्राचीनसंस्कृते: शास्त्रज्ञानस्य परिचय: ।<br>➢ पाठे विद्यमानानाम् संस्कृतशब्दसमूहानां परिचय:, तेषां अर्थविशेषज्ञानम् । | ● भारतीयप्राचीनपरम्पराविषये पूर्वज्ञानपरीक्षणद्वारा अभिप्रेरणम् ।<br>● आदर्शवाचनं, अनुवाचनं, समूहवाचनम् इत्यादि ।<br>● कठिणशब्दानां अर्थकथनम् पाठविवरणम् । | ▪ भारते प्रचलितानां भाषाणां नामानि वक्तुं अध्यापक: प्रोत्साहयति ।<br>▪ पठने विद्यमानं उच्चारणदोषं परिहरति ।<br>▪ सान्दर्भिकप्रश्नकरणद्वारा अधिगमपरीक्षणम् । |
| | क्रियाकलाप: 2 | ➢ प्राचीनसंस्कृतग्रन्थानां परिचय:।<br>➢ इतरभाषापेक्षया सम्स्कृतभाषाया: वैशिष्ट्यस्य प्रदर्शनम् । | ● वेदवेदान्तानां ग्रन्थानां प्रदर्शनम् । काव्यशास्त्राणां परिशीलनम्<br>● व्यासवाल्मीकि कालिदास इत्यादि कवीनां तथा आर्यभट, पाणिनि इत्यादिशास्त्रकाराणां परिचय:, तेषां ग्रन्थावलोकनं च । | ▪ वेदानां नामानि वक्तुं पृच्छति ।<br>▪ वैद्यकीयशास्त्रग्रन्थानां कृते प्रश्नकरणम् ।<br>▪ रामायण महाभारतादि ग्रन्थान् उक्त्वा रचयितॄणां विषये प्रश्नकरणम् । |
| | क्रियाकलाप: 3 | ➢ लट् लकरास्य परस्मैपदस्य परिचय: ।<br>➢ न,च,एव इत्यादि अव्ययानां परिचय: । | ● लट् लकार: कस्मिन् सन्दर्भे प्रयुज्यते इति प्रदर्शनम् ।पुरुषवचनानां च परिचय:<br>● छात्राणां गणविभागं कृत्वा अव्ययानि उपयुज्य वाक्यप्रयोग: । अपि च वाक्यम् | ▪ क्रियापदसंबधिदोषयुक्तवाक्यप्रदानम् । छात्रा: तान् समीकुर्वन्ति ।<br>▪ न, च, अपि इत्यादि अव्ययानां कृते विविधभाषासुक: अर्थ: ? इति प्रश्नकरणम् । |

| | | | | |
|---|---|---|---|---|
| | | | उक्त्वा वाक्ये विद्यमान अव्ययस्य चयनद्वारा अधिगम:। | |

## अभ्यासपत्रिका

1] एकवाक्येन उत्तरयत -

१.देवभाषा का ?

२.विष्वस्य प्रथम: साहित्यप्रकार: क: ?

३.रामाणयस्य कर्ता क: ?

४.भगवद्गीता कस्मिन् ग्रन्थे अस्ति ?

५.कृषिशास्त्रे क: महर्षि: प्रसिद्ध: ?

2] अव्ययानि उपयुज्य वाक्यं रचयत -

१. च, २.न ३.एव, ४.इति

3] नामपदं क्रियापदं पृथक् कुरुत ।

१. भाषा, विष्णुशर्मा, अस्ति, विराजते, ग्रन्थान्, पञ्चतन्त्रम्, शोभते, महर्षि:, सन्ति, लिखति ।

| नामपदम् | क्रियापदम् |
|---|---|
| १.-------------- | १.---------- |

२.-------------- २.----------

३.-------------- ३.----------

४.-------------- ४.----------

५.-------------- ५.----------

-----------------***-----------------------*****-----------------***--------------------
--

- प्रश्नपत्रिका - अङ्का: २०

१} एकवाक्येन उत्तरं लिखत - [१x५=५]

१.चटक: कुत्र निवसति ?

२.देवभाषा का ?

३.रामायणस्य रचयिता क: ?

४.पाणिनिमुनिना रचित: ग्रन्थ: क: ?

५.मधुरालापं कुरु इति शिशु: कं प्रार्थयति ?

२} रिक्तस्थानं पूरयत - [१x३=३]

१.चणकं स्वीकुरु पिब रे ---- ।

२.-------, वर्तेते , वर्तन्ते ।

३. कौटिलस्य कृति: --------।

३} संयोजयत - [१x४=४]

| <u>अ</u> | <u>आ</u> |
|---|---|
| १.आवाम् | नीडे |
| २.निवससि | अर्थशास्त्रम् |
| ३.आर्यभट: | पठाव: |
| ४.राजनीति: | खगोलविज्ञानी |

४} पदानि उपयुज्य वाक्यानि रचयत - [१x३=३]

१. करोति २.मधुरालापम् ३.इति

५} लकारपुरुषवचनानि लिखत - [१x३=३]

१. पश्यति, २.वर्तते, ३.कूजसि

६} संस्कृतभषाया: महत्वं उद्दिश्य मातृभाषायां विवृणुत । [१x२=२]

-*-*-*-*-